# Onkaraproktam Muktisadhanartham Shivarchanopadesham 1

# ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશમ્ ૧

## Document Information

Text title : Onkaraproktam Muktisadhanartham Shivarchanopadesham 1

File name : shivArchanopadesham1muktisAdhanArthaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 515.1-525||

Latest update : May 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 3, 2024

*sanskritdocuments.org*

# ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશમ્ ૧

કશ્યપ ઉવાચ -
પુરોઙ્કારં મૂર્તિમન્તં શિવધ્યાનપરાયણમ્ ॥ ૫૧૪॥

બ્રહ્મવિષ્ણ્વાદયો દેવા દૃષ્ટ્વા પ્રોચુર્મુમુક્ષવઃ ।
દેવા ઊચુઃ
ત્વમોઙ્કારોઽસ્યતસ્તત્ત્વં ત્વયૈવ જ્ઞાયતે તતઃ ॥ ૫૧૫॥

કિં ધ્યેયં સતતં મુક્ત્યૈ તદ્વિચાર્ય વદસ્વ નઃ ।
શ્રી ઓઙ્કાર ઉવાચ -
મોક્ષાર્થં શિવ એવૈકો ધ્યેયઃ સર્વૈરહર્નિશમ્ ॥ ૫૧૬॥

સર્વમન્યત્પરિત્યજ્ય સાદરં ભક્તિપૂર્વકમ્ ।
યઃ પિતા ભવતાં દેવાઃ સ એવ શિવ ઉચ્યતે ॥ ૫૧૭॥

સ એવ પાર્વતીનાથ યઃ સર્વસુરસત્તમઃ ।
સ એવ શ્રીમહાદેવઃ સ એવ ત્રિપુરાન્તકઃ ॥ ૫૧૮॥

સ એવ વેદજનકઃ સ એવાન્ધકસૂદનઃ ।
સં એવ વિષ્ણુસંહર્તા સ એવ મદનાન્તકઃ ॥ ૫૧૯॥

સ એવ બ્રહ્મસંહર્તા સ એવેન્દ્રવિનાશકઃ ।
સ એવ મમસંહર્તા સ એવાખિલશાસકઃ ॥ ૫૨૦॥

એતાદૃશં શિવં મત્વા સચ્ચિદાનન્દલક્ષણમ્ ।
પૂજયધ્વં પ્રયત્નેન મુક્તયર્થં સર્વસાધનૈઃ ॥ ૫૨૧॥

શિવાર્ચનં શિવધ્યાનં શિવનામાનુકીર્તનમ્ ।
શિવક્ષેત્રનિવાસશ્ચ મુક્તિસાધનમુચ્યતે ॥ ૫૨૨॥

શિવાર્ચનં ચ વિધિવન્નાનાવેદાન્તસમ્મતમ્ ।
તન્મોક્ષદમિતિ પ્રોક્તં મહેશેનાતિતત્ત્વતઃ ॥ ૫૨૩॥

- -
પુરા પૃષ્ટો મહાદેવઃ શિવયા જ્ઞાનરૂપયા ।
કિં મોક્ષદમિતિ પ્રીત્યા તદાઽઽહ ભગવાઞ્છિવઃ ॥ ૫૨૪॥

શ્રીસદાશિવ ઉવાચ -
શિવે મદર્ચનં ધ્યાનં મન્નામ્નામનુકીર્તનમ્ ।
મદિષ્ટક્ષેત્રવાસશ્ચ મુક્તિસાધનમક્ષતમ્ ॥ ૫૨૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૫૧૫।૧-૫૨૫॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 515.1-525 ..

Notes:

Brahmā બ્રહ્મા, Viṣṇu વિષ્ણુ et al Deva-s દેવાઃ observe the Form of Oṃkāra ઓંકાર engaged in Śivadhyāna શિવધ્યાન and are curious to know from him about who should be worshiped in order to attain Mukti મુક્તિ. Oṃkāra ઓંકાર delivers the upadeśa ઉપદેશ about Cultivating worship of Śiva શિવ; and, that Śivārcanam શિવાર્ચનમ્, Śivadhyānam શિવધ્યાનમ્, Śivanāmānukīrtanam શિવનામાનુકીર્તનમ્ and Śivakṣetranivāsa શિવક્ષેત્રનિવાસ is the means to Liberation (Muktisādhana મુક્તિસાધન). He conveys that upon being requested by Śivā શિવા, the same was also told by Śiva શિવ.

Encoded and proofread by Ruma Dewan

*Onkaraproktam Muktisadhanartham Shivarchanopadesham 1*

pdf was typeset on May 3, 2024

Please send corrections to *sanskrit@cheerful.com*